# Padmavati Kavacham

# પદ્માવતીકવચમ્

## Document Information

Text title : padmAvatIkavacham

File name : padmAvatIkavacham.itx

Category : devii, kavacha, otherforms , devI

Location : doc_devii

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : devIyAmalatantra

Latest update : August 3, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# પદ્માવતીકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીભૈરવ ઉવાચ ।
અધુના કવચં દિવ્યં મન્ત્રગર્ભં વરાભયમ્ ।
વક્ષ્યે પાર્વતિ ભક્તાતે વજ્રપઞ્જરકાભિધમ્ ॥ ૧॥

ગુહ્યં ચ પરમં ગુહ્યં સર્વસ્વં મે રહસ્યકમ્ ।
સર્વમન્ત્રમયં તત્ત્વં દેવી પદ્માવતી પ્રિયમ્ ॥ ૨॥

વિનાજ્ઞાનેન સિદ્ધિઃ સ્યાત્કવચેન્દ્રેણ પાર્વતિ ।
મન્ત્રસ્યાસ્ય મહાદેવ્યા નાખ્યેયં યત્રકુત્રચિત્ ॥ ૩॥

અસ્ય ધારણમાત્રેણ ભૈરવોઽહં શિવોઽસ્મ્યહમ્ ।
વિષ્ણુર્નારાયણો લોકે બ્રહ્મલોક પિતામહઃ ॥ ૪॥

ઇન્દ્રો દિવસ્પતિર્દેવિ ગુરુર્વાગીશતાઙ્ગતઃ ।
શુક્રો દૈત્યગુરુર્દેવિ યઃ પઠેદ્શ્રાવયેદપિ ॥ ૫॥

ધારયેન્મૂર્ધ્નિ વા બાહૌ સભવેદ્ભોગમોક્ષભાક્ ।
કવચસ્યાસ્ય દેવેશિ સદાશિવ ઋષિરુઢતઃ ॥ ૬॥

ત્રિષ્ટુપ છન્દ ઇતિખ્યાતં દેવી પદ્માવતી સ્મૃતા ।
રમાબીજં પરાશક્તિઃ કામઃ કીલકમીશ્વરિ ॥ ૭॥

ભોગાપવર્ગ સિધ્યર્થં ધારયેવિનિયોગકઃ ।

ૐ અસ્ય શ્રીપદ્માવતીવજ્રપઞ્જરકવચસ્ય શ્રીસદાશિવઋષિઃ
ત્રિષ્ટુપછન્દઃ શ્રીસર્વજ્ઞેશ્વરસહિતા શ્રીપદ્માવતીદેવતા
શ્રીં બીજં હ્રીં શક્તિઃ ક્લીં કીલકં શ્રીભોગાપવર્ગસિદ્ધ્યર્થં
કવચેપાઠેધારણે વિનિયોગઃ ॥

ૐ હ્રીં શ્રીં મે શિરઃ પાતુ રાજ્યલક્ષ્મીઃ શિવપ્રિયા ।

ક્લીં બ્લૂં ફટ્ પાતુ નેત્રે મહાલક્ષ્મીર્હરિપ્રિયા ॥ ૮॥

ૐ ઐં ક્લીં મે શ્રુતી પાતુ સિદ્ધલક્ષ્મી શિવાસના ।
દયાવતી પાતુ નાસાં પાતુ સત્યવતી મુખમ્ ॥ ૯॥

કણ્ઠં યશોવતી પાતુ સ્કન્ધૌપાત્વમરાવતી ।
પ્રભાવતી ભુજૌ પાતુ પાયાદ્ધનવતી કરૌ ॥ ૧૦॥

વક્ષઃ ક્રિયાવતી પાતુ સ્તનૌ પાતુમરાવતી ।
કુક્ષિં મે કમલા પાતુ નાભિં મે વિમલાવતુ ॥ ૧૧॥

પાર્શ્વૌમમાવૃતાન્માલા વિશાલાક્ષીં કટિં મમ ।
પૃષ્ઠં કપાલિની પાતુ લિઙ્ગં મેઽવતુ માલિની ॥ ૧૨॥

હારિણી પાતુ મે મેઢ્રે ગુદં હાલાચતાન્મમ ।
મમોરૂ બાલિકા પાતુ જાનૂ મે કોમલાવતુ ॥ ૧૩॥

બલામમાવતાજ્જઙ્ઘે ગુલ્ફૌ સેવ્યાદ્ધલાકિની ।
પાદૌ મે શાકિની પાતુ લાકિની નખરાન્મમ ॥ ૧૪॥

પાદાદિમૂર્ધપર્યન્તં ડાકિની પાતુ મેવપુઃ ।
શિરસઃ પાદપર્યન્તં ખેચરી સકલં વપુઃ ॥ ૧૫॥

પૂર્વે માં પાતુ બ્રહ્માણી વહ્નૌ નારાયણી ચ મામ્ ।
પશ્ચિમે પાતુ માં નિત્યં મઙ્ગલાખ્યાપરાજિતા ॥ ૧૬॥

વાયવ્યે પાતુ કૌમારી વારાહીચોત્તરેઽવતુ ।
ઐશાન્યાં નારસિંહી માં પાતુ સર્વત્ર સર્વદા ॥ ૧૭॥

અસિતાઙ્ગઃ પ્રભાતેવ્યાન્મધ્યાહ્ને રુરુભૈરવઃ ।
નિશાન્તેઽવતુસોન્મત્તઃ સર્વદામાં કપાલકઃ ॥ ૧૮॥

રાત્રિર્દિનં ભીષણેશઃ સંહારઃ સર્વતોઽવતુ ।
સર્વતઃ સર્વદા સત્યં રણે રાજભયાદિષુ ॥ ૧૯॥

પાતુ માં સકલત્રં ચ દેવી પદ્માવતી પરા ।
ઇન્દ્રોમે કમલાં પાતુ પાતુ વહ્નિ ભયાચ્ચમામ્ ॥ ૨૦॥

ધર્મરાજોઽવતાદ્ધર્મં રક્ષોભીતિષુનિન્દતિઃ ।
વરુણઃ સલિલા પાતુ કલ્પાન્તપવનાન્મરુત્ ॥ ૨૧॥

ધનં ધનપતિઃ પાયાદૈશ્વર્યં પરમેશ્વરઃ ।
ઊર્ધ્વં બ્રહ્મા સદા પાયાદધોનારાયણોઽવતુઃ ॥ ૨૨॥

સર્વતઃ સકલં સેવ્યાત્સવજ્ઞેશ્વરભૈરવઃ ।
ૐ ૐ ૐ વં વં ૐ વિષાદ્વિષધરાત્પદ્માવતી પાતુમામ્ ॥ ૨૩॥

હ્રીં હ્રીં હ્રીં હ હ હા હ્સૌઃ હયગજન્ત્રાસાત્પરાપાતુ મામ્ ।
શ્રીં શ્રીં શ્રીં શ શ શા શશાઙ્કમુકુટઃ સર્વજ્ઞનાથોઽવતુ ॥ ૨૪॥

ક્લીં ક્લીં ક્લીં કલિપાવતોરિપુભયાન્નાગેન્દ્રભૂનાયકી ।
ઇતીદં કવચં દિવ્યં વજ્રપઞ્જરકાભિધમ્ ।
સર્વમન્ત્રમયં સિદ્ધં સર્વદેવીમયં પરમ્ ॥ ૨૫॥

સર્વ સમ્મોહનં વર્મ સર્વાસા પરિપૂરકમ્ ।
ધનદં કીર્તિદં દેવિ સર્વસારસ્વતપ્રદમ્ ॥ ૨૬॥

સર્વપૂજારહસ્યં ચ સર્વયજ્ઞફલપ્રદમ્ ।
સર્વૈશ્વર્યપ્રદં તત્ત્વં સર્વમન્ત્રરહસ્યકમ્ ॥ ૨૭॥

યઃ પઠેત્પાઠયેદ્વાપિ શ‍ૃણોતિ શ્રાવયેદપિ ।
સવાગ્મીધનવાંલ્લોકે વિદ્યયા ગુરૂસન્નિભઃ ॥ ૨૮॥

ઐશ્વર્યેણ મહેશસ્તુ શ્રિયાવૈશ્રવણોપમઃ ।
બલેન વાયુઃસદૃશોનીત્યા ભાર્ગવસન્નિભઃ ॥ ૨૯॥

જયવાન્ રામસદૃશો દયયાવિષ્ણુદેવસઃ ।
બહુનોક્તેન કિં દેવિ યઃ પઠેદ્ધારયેદિદમ્ ॥ ૩૦॥

ઇહલોકે રિપૂઞ્જિત્વા પ્રાપ્નુયાન્નિશ્ચલાં શ્રિયમ્ ।
રવૌભૂર્જે લિખેદ્વર્મ મૂલમન્ત્રમયં શિવે ॥ ૩૧॥

સયન્ત્રં વાષ્ટગન્ધેન માતૃકાક્ષરવેષ્ટિતમ્ ।
શ્વેતસૂત્રેણ સંવેષ્ટ્ય લાક્ષયાપરિવેષ્ટયેત્ ॥ ૩૨॥

સૌવર્ણેનાથ સંવેષ્ટ્ય પૂજયેદ્યન્ત્રરાજવત્ ।
ધારયન્ મૂર્ધ્નિવાબાહૌયોષિદ્વામકરેતથા ॥ ૩૩॥

કિં કિં ન સાધયેદ્વીરો ભવેદ્ભૈરવસન્નિભઃ ।
વન્ધ્યાપ્રસૂયતે પુત્રાન્ કાકવન્ધ્યાચિરાયુષઃ ॥ ૩૪॥

મૃતવત્સાપિદેવેશિ લભેત્પુત્રકુલોત્તમાન્ ।

રણેરિપૂઞ્જયેદ્વીરઃ શચ્યરાજ્યમકણ્ટકમ્ ॥ ૩૫॥

ભુક્ત્વાભોગાં લભેદન્તે પરં ભાગવતં પદમ્ ।
ઇદં રહસ્યમેશાનિ તવભક્ત્યામયેરિતમ્ ॥ ૩૬॥

અદાતવ્યમભક્તાય ગોપનીયં સ્વયોનિવત્ ।

ઇતિ શ્રીદેવીયામલતન્ત્રે ષડામ્નાય પ્રદીપિકાયાં
પદ્માવતીકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

---

*Padmavati Kavacham*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*